**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 9.134
Volume - 9, Issue - 1, January - 2026

DOIs:10.2018/SS/202601020 --:-- Research Paper / Article / Review

# न्यायशास्त्रे निःश्रेयसप्राप्तौ छलस्योपयोगित्वम्

**Pankaj Das**
Ph.D. Research Scholar, Sanskrit Department, Ramakrishna Mission Vidyamandira, Belur Math, India
Email – pankaj.das.vedvid@gmail.com

***Abstract:*** *नैयायिकसम्मतनां षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसप्राप्तिर्भवति। तत्त्वज्ञाने मिथ्याज्ञाननाशः, मिथ्याज्ञाननाशात् दोषनाशः, दोषनाशात् प्रवृत्तिनाशः, प्रवृत्तिनाशात् जन्मनाशः, जन्मनाशात् दुःखनाशः। चमदुःखध्वंस एव मोक्षः। मोक्षः, अपवर्गः, निःश्रेयसम् इति नामान्तरम्। तर्हि मोक्षं प्रति षोडशपदार्थानां तत्त्वज्ञानं कारणं भवति। नैयायिकसम्मतेषु षोडशपदार्थेषु छलं पञ्चदशतमम्। निःश्रेयसप्राप्तौ छलस्य उपयोगिता किम् अस्ति तदत्र विचार्यते। अत्र छलस्य किं लक्षणम्। को वा तस्य भेदः, किं वा तेषां लक्षणम्, निःश्रेयसप्राप्तौ छलस्य किम् उपयोगित्वमस्ति- एते विषयाः विस्तरेण अस्मिन् गवेषणापत्रे विचार्यते।*

***Key Words:*** *छलम्, दुःखम्, अपवर्गः, मोक्षः*

## 1. उपोद्घातः

दुःखमये अस्मिन् जगति जीवानां कर्मप्रवृत्तिः आनन्दलाभाय एव। आनन्दस्तु विषयस्वरूपगतभेदेन द्विविधः एव। सा आनन्दप्राप्तिः पुरुषार्थः इति कथ्यते। पुरुषाणां जीवात्मानाम्, अर्थः प्रयोजनं पुरुषार्थः इति कथ्यते। पुरुषार्थः नाम जीवात्मानां प्रयोजनम्। तत्प्रयोजनं प्रकारताय द्विविधम् इन्द्रियनिरिन्द्रियभेदेन। इन्द्रियं नाम इन्द्रियजन्यं प्रयोजनम्। तत्प्राप्तिस्तु अर्थद्वारा एव भवति, तत्प्रयोजनं काम इत्युच्यते। अत्र कामपदेन लौकिकार्थः न ग्राह्यः। कामसूत्रे वात्स्यायानाचार्येण कामस्य द्वैविध्यता स्वीकृता। सामान्यकामः विशेषकामश्च। लोके तु कामशब्दवाच्यः विशेषकामः। सामान्यतया सर्वे एव इच्छादयः सामान्यकामपदवाच्यः। कामस्तु उपेयः। उपायस्तु अर्थः एव। निरिन्द्रियं प्रयोजनं भवति मोक्षः। तत्र स्वरूपतः आनन्दप्राप्तिर्भवति। तत्र दुःखनिवृत्तिरानन्दप्राप्तिश्च भवति। तस्मात् कारणात् परमत्वं विशेषणम्। एतेषां प्रयोजनानां विषयवैभिन्नेन प्रतिपादकत्वेन अस्मत्सविधे आचार्याः शास्त्रम् उपस्थापितवन्तः। शास्त्रं नाम पुरुषार्थतत्साधनान्यतरादृष्टत्वशालिविषयकोपदेष्टृ अदृष्टसाध्यसाधनभावोपदेष्टृ वा। धर्मप्रतिपादकं आचार्यमन्वादिभिः रचितं धर्मशास्त्रम्, आचार्यकौटिल्येन रचितम् अर्थशास्त्रम्, आचार्यवात्स्यायनेन रचितं कामशास्त्रम्। मोक्षशास्त्रं तु दर्शनशास्त्रम् इति कथ्यते। आस्तिकनास्तिकभेदन द्वैविध्यं गतम्। तत्र बृहस्पतिरचितं चार्वाकदर्शनम्, सुगतप्रणीतं सौगतदर्शनम्, वर्धमानप्रणीतम् आर्हतदर्शनम् इति नास्तिकदर्शनम्। महर्षिकपिलप्रणीतं सांख्यदर्शनम्, महर्षिपतञ्जलिप्रवर्तितं पातञ्जलदर्शनम्, कणादरचितं काणाददर्शनम्, महर्षिगौतमरचितं गौतमीयदर्शनम्, जैमिनिनिगदितं जैमिनीयदर्शनम्, महर्षिवादरायणोदीरितं ब्रह्ममीमांसादर्शनम् इति मोक्षप्रतिपादकानि मोक्षशस्त्राणि। परन्तु सर्वेषां दर्शननां नये तत्स्वरूपं भिन्नं भिन्नं मेव। तेषु दर्शनेषु मूर्धन्यरूपेण विराजितानि तर्कसभायां मध्यमणिरूपेणावस्थितानि अनियततत्त्वप्रतिपादकानि न्यायशास्त्राणि। तन्मते मोक्षः निःश्रेयसम् अपवर्गो वा इत्युच्यते। न्यायमते कथं निःश्रेयसप्राप्तिर्भवति। तथा हि *न्यायसूत्र*कारेण आचार्येण गौतमेन उदीरितम्- 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः[1] इति। एतेषां पदार्थानां तत्त्वज्ञानात् निःश्रेयसाधिगमः। क्रमः उच्यते द्वितीयसूत्रे- 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापयादपवर्गः'[2] इति। एतेषां पदार्थानां श्रवणमनननिदिध्यासनेन

तत्वज्ञानं जायते। तत्वज्ञानात् मिथ्याज्ञाननाशः भवति, मिथ्याज्ञाननाशात् दोषनाशः, दोषनाशात् प्रवृत्तिनाशः, प्रवृत्तिनाशात् जन्मनाशः, जन्मनाशात् दुःखनाशः, दुःखनाशात् अपवर्गः। न्यायमते दुःखानाम् आत्यन्तिकनिवृत्तिरेव मोक्षः इति केचित्। अतः सर्वेषां पदार्थानां अपवर्गे उपयोगित्वमस्त्येव। तन्मध्ये छलपदार्थस्य मोक्षे किमुपयोगित्वं वर्तते तदत्र निरूप्यते।

## 2. छलस्वरूपं भेदश्च

प्रमाणादिषोडशपदार्थानां तत्वाज्ञानात् एव अपवर्गः। तत्र चतुर्दशतमः पदार्थः छलम्। छोधातोः वृषादित्वात् कलचप्रत्यये, छल्धातो अचि प्रत्यये छलशब्दो निष्पद्यते। साधारणताय छलपदेन प्रगल्भता, कपटता, शाठ्यं, स्खलितं वेत्युच्यते। अमरकोषे निगदितं-

'विस्फारो धनुषः स्वानः पताहाडम्बरो समौ।
प्रसभं तु बलात्कारो हठोऽथ स्खलितं छलम्॥' (अमरकोशः-२.८.१०८)

शास्त्रयुद्धे सदुत्तरप्रदाने असमर्थे पराजयात् स्वरक्षार्थम् असदुत्तमाश्रित्य जिगीषति। तदेव छलमिति कथ्यते। युद्धे स्वरक्षार्थं पलायनाप्रतिज्ञाभङ्गादि छलमिति कथ्यते। क्रीडायां द्युतक्रिडा एव छलम्। *श्रीमद्भगवद्गीतायां* भगवतोदीरितम्-

'द्युतं छलयतामस्मि तेजस्तेजस्विनामहम्।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्।।'[3] इति।

छलनाकारिणां मध्ये अहं (भगवान् श्रीकृष्णः) द्युतक्रीडा।

'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः' इति भाष्यवचनात् लक्षणप्रमाणाभ्यां वस्तुनः अस्तित्वं ज्ञायते एव। प्रथमसूत्रे उद्देशानन्तरं द्वितीयाह्निके छलपदार्थस्य लक्षणमुदीरितम्- 'वचनविघातकोऽर्थविकल्पोपपत्त्या छलम्'[4] (१.२.१०) इति। अत्र छलमिति लक्ष्यपदम्। वचनविघाकतोऽर्थविकल्पोपपत्त्या इति लक्षणम्। अर्थानां विकल्पः अर्थविकल्पः इति षष्ठीतत्पुरुषसमासः। अर्थविकल्पः एव उपपतिः अर्थविकल्पोपपत्तिः इति कर्मधारयसमासः। अर्थविकल्पः नाम अर्थानां विरुद्धकल्पना। अर्थात् वादिनः ईप्सितार्थात् विरुद्धार्थकल्पना। विरुद्धार्थेन युक्त्या वादिवचनस्य विघातः छलम्। तथा हि *तात्पर्यटीकायां* वाचस्पतिमिश्रेणोदीरितम्- 'यथा वक्तुरभिमतोऽर्थः ततो विरुद्धः अर्थः, तस्य विकल्प कल्पना, सैवोपपत्तिः तया'[5] इति। *न्यायसूत्रवृत्तौ* आचार्यविश्वनाथेनापि भिन्नं मतं प्रतिपादितम्- 'अर्थस्य वाद्यभिमतस्य यो विकल्पः विरुद्धः कल्पोऽर्थान्तरः कल्पनेति यावत्, तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वाद्युक्तस्य विघातो दूषणं, तच्छलम्।'[6] इति। अर्थात् वक्तुः तात्पर्याविषयीभूतार्थकल्पनया वादीप्रयुक्तवाक्यस्य दूषणमेव छलम्। विश्वनाथन्यायपञ्चाननेन *न्यायसूत्रवृत्तौ* स्वीकृता- 'वक्तृतात्पर्याविषयाख्यकल्पनेन दूषणाभिमतमिति फलितम्'[7] इति। वक्तृतात्पर्याविषयत्वं त्रिविधम्- विशेष्यनिष्ठं, विशेषणनिष्ठं, संसर्गनिष्ठं चेति।

विशेष्यनिष्ठतात्पर्यविषयत्वं यथा- वादिना उच्यते- 'नेपालादागतोऽयं नवकम्बलवत्त्वात्' इति। वादिनः अभिप्रायस्तावत् नेपालनामकशैत्यप्रावल्यात् देशात् अगतोऽयं पुरुषः नूतनकम्बलविशिष्टः इति। प्रतिवादिना अस्य विपरीताभिप्रायः गृह्यते, यथा- नवसंख्यककम्बलविशिष्टः पुरुषः आगतः नेपालात्। प्रतिवादी अस्य दोषमुद्भाव्य जिज्ञासितवान् एकोऽस्य कम्बलः, कुतो नव कम्बलाः इति। अत्र वादिनः अभिप्रायः नूतनकम्बलः परन्तु प्रतिवादिनः अभिप्रायस्तु नव कम्बलाः इति अर्थं संगृह्य हेत्वसिद्धिः अभिहितः इति छलम्। अत्र वक्तृतात्पर्याविषयीभूतार्थः नवकम्बलसंख्याविशिष्टः विशेष्यनिष्ठ एव।

विशेषणनिष्ठतात्पर्यविषयत्वं यथा- सर्वं प्रमेयं धर्मत्वात् इत्यत्र वादिनः अभिप्रायो हि जगति सर्वं प्रमेयं धर्मत्वात्। परन्तु प्रतिवादिनः धर्मशब्दस्य अदृष्टादिकम् अर्थं संगृह्य दूषयन्ति। प्रतिवादिनः आशयो यथा- जगति सर्वेषु प्रमेयवस्तुषु पुण्यत्वादिधर्माः न विद्यन्ते। अर्थात् धर्मशब्देन पुण्यत्वादिकम् अर्थं गृहीतवन्तः प्रतिवादिनः। अतः हेतोः पक्षैकदेशवृत्तित्वात् भागासिद्धः हेत्वाभासः। अत्र वक्तृतात्पर्याविषयीभूतार्थः पुण्यत्वरूपधर्मः विशेषणनिष्ठ एव।

संसर्गनिष्ठतात्पर्याविषयत्वं यथा- वादी वदति- पर्वतः वह्निमान् धूमात् इत्यत्र पक्षः पर्वतः, साध्यः वह्निः, हेतुः- धूमः। साध्याभाववदवृत्तित्वमिति व्याप्तिलक्षणम्। अत्र साध्यः = वह्निः, साध्याभावः = वह्न्याभावः, साध्याभाववद् = वह्न्याभाववद् जलह्रदः, तत्र धूमस्य अवृत्तित्वम् इति लक्षणसङ्गतिः। प्रतिवादी वदति- साध्यः = वह्निः, साध्याभावः = वह्न्याभावः,

साध्याभावाधिकरणं = वह्न्यभावाधिकरणं धूमावयवः, तत्र समवायेन धूमस्य वृत्तित्वम्। अतः अत्र अव्याप्तिः। अत्र समवायसंसर्गेण दूषयति। अत्र वक्तृतात्पर्यविषयीभूतार्थः समवायः संसर्गनिष्ठ एव।

अतः एव एतद्वक्तुं शक्यते हेत्वाभासान् अवलम्ब्य छलं प्रयुङ्क्ते। तस्मात् न्यायसूत्रे हेत्वाभासानन्तरं छलस्य उद्देशः विहितः।

तच्च छलं त्रिविधं वाक्छलसामान्यच्छलोपचारच्छलभेदेन। तथाहि *न्यायसूत्रे* महर्षिणोदीरितम्- 'तत् त्रिविधं वाक्छलं सामान्यच्छलमुपाचारच्छलं चेति।'[8] तत्त्रिविधमित्यनेन अखिलच्छलस्य त्रिविधच्छलमध्ये अन्तर्भावो भवति। अर्थात् न्यूनाधिकसंख्याव्यवच्छेदार्थं तत्त्रिविधमित्यप्युक्तम्। *तात्पर्यटीकायां* वाचस्पतिमिश्रमहाभागेनोदीरितम्- 'छलसामान्यलक्षणमभिधाय तद्विशेषलक्षणान्यभिधातुं प्रथमं तावन्न्यूनाधिकसंख्याव्यवच्छेदार्थं विभागमवतारयति...' इति। छलत्रैविध्यं क्रमेण प्रकाश्यते-

**वाक्छलम्-** वाचि छलम् वाक्छलम्। निमित्तत्वं सप्तम्यर्थः। वाचि निमित्ते छलं वाक्छलम्। सूत्रयति सूत्रकारः- 'अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्'[9] इति। सति शक्यार्थद्वये एकार्थनिर्णायकविशेषाभावाद् अनभिप्रेतशक्यार्थकल्पने दूषणाभिधानं वाक्छलम्। यथा- नेपालादगतोऽयं नवकम्बलवत्त्वात् इत्यत्र नवकम्बलशब्दः नूतनकम्बलार्थे नवसंख्यककम्बलार्थे अविशेषेण उच्चारितः। सामान्यशब्दः द्विविधः वाक्यरूपः पदरूपश्चेति। वाक्यरूपः सामान्यशब्दः यथा- नवकम्बलः इति। पदरूपः सामान्यशब्दः यथा- अश्वोऽश्वः इत्यत्र प्रथमोऽश्वः शब्दः अश्वत्ववाचकः, द्वितीयः अश्वशब्दः आख्यातवाचकः बृद्ध्यर्थकः। तथाहि *न्यायवार्तिके* उदायणाचार्येणोदीरितम्- 'अविशेषाभिहितं सामान्यश्रुति वाक्यं पदं वा अविशेषाभिहितमित्युच्यते। वाक्यं सामान्यश्रुति यथा नवकम्बलोऽयमिति। पदं सामान्यश्रुतिः यथा अश्वोऽश्वः इति।'[10] इति। पदसामान्यस्य विस्तरेण व्याख्यानं विहितं टीकाकारेण वाचस्पतिमिश्रेण- 'अश्व इति नामपदत्वस्य वाचकम्, आख्यातपदं यदा कस्यचिदभिमुखं प्रयुज्यते अश्व इति, तदा बृद्धिं गतोऽसीति प्रतीयते'[11] इति।

उभयार्थकशब्दस्य समनता कस्यां दृष्टौ? उच्यते विश्वनाथेन- 'एकार्थनिर्णायकविशेषाभावात्'[12] इति। एकस्मिन् शब्दे उच्चारिते नानार्थः प्रकाशितः भवति, स नानार्थकशब्दः उच्यते। नानार्थकशब्दानां कोऽर्थः ग्राह्यः, तद्विषये एका निर्णायिका कारिका वर्तते यथा-

> अर्थात् प्रकरणाल्लिङ्गादौचित्याद्देशकालतः।
> शब्दार्थाश्च विभज्यन्ते न रूपादेव केवलम्।। इति।।

अर्थनिर्णायकाः यथा- प्रकरम्, औचित्यं, लिङ्गं, देशः, कालः इत्यादयः।

**सामान्यच्छलम्-** सूत्रकारेण सूत्रितम्- 'सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्' इति। अत्र सामान्यच्छलं लक्ष्यम्। लक्षणं हि सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पनात्वम् इति। सामान्यविशिष्टसम्भाव्यमानार्थानाम् अभिप्राये उक्तवचने विवक्षितार्थम् अतिक्रम्य सामान्यधर्मसम्भन्धवशात् असम्भूतार्थकल्पनया यद्दूषणाभिधानां सामान्यच्छलम्।

सामान्यच्छलमुदाहरति- कोऽपि ब्राह्मणं दृष्ट्वा सानन्दम् उक्तवान्- अहो खल्वसौ ब्राह्मणो विद्याचरणसम्पन्नः इति। एतत् निशम्य कोऽपि ब्राह्मणत्वप्रशंसाकल्पे उक्तवान्- सम्भवति ब्राह्मणे विद्याचरणसम्पदिति। एतन्निशम्य प्रतिवादी वादिनः अभिप्रायं परित्यज्य वाक्यस्य विघातमुद्दिश्य उक्तवान्- यदि ब्राह्मणे विद्याचरणसम्पत् सम्भवति, तर्हि व्रात्योऽपि सम्भवेत्, यतः व्रात्योऽपि ब्राह्मणः, सोऽप्यस्तु विद्याचरणसम्पन्न इति। अत्र ब्राह्मणपदस्य विवक्षितार्थो हि उपनयनसंस्कारसम्पन्नब्राह्मणविशेषः। अयं ब्राह्मणत्वजातिरपि अविद्वद्व्रात्यब्राह्मणेऽपि वर्तते। अर्थात् ब्राह्मणत्वसामान्यधर्मः विवक्षितार्थेऽपि वर्तते, तदतिक्रम्य अन्यत्रापि वर्तते। तस्मात् ब्राह्मणत्वधर्मः अतिसामान्यधर्मः। प्रतिवादिनः वाक्ये अतिसामान्यधर्माणां योगवशात्, विद्याचरणसम्पत्साधकहेतुरूपेण ब्राह्मणत्वजातौ अर्थकल्पनया वादिवाक्ये दोषोद्भावनं समान्यच्छलम् इति। वक्ता ब्राह्मणत्वजातेः प्रशंसार्थे वाक्यमिदं प्रयुक्तवान्। परन्तु प्रतिवादी ब्राह्मणत्वजातौ विद्याचरणसम्पत्तिरूपसाध्यस्य हेतुत्वमारोप्य वादिवचनस्य विघातं कृतवान्। तस्मात् वादिवाक्ये दोषः न स्यात्। अतः प्रतिवादिकर्तृतसामान्यच्छलमपि असदुत्तरमेव। तथा हि

वाचस्पतिमिश्रेण *तात्पर्यटीकायाम्*उच्यते- 'सम्भवति ब्राह्मणे विद्याचरणसम्पदिति, तदपि वाक्यं स्तुत्यर्थमेव, न त्वस्य ब्राह्मणत्वद्धेतोर्विद्याचरणसम्पद्विवक्षितेति। तत्र परो हेतुत्वमस्या विवक्षितमारोप्य वचनं विहन्तीति तदिदं सामान्यच्छलम्'[13] इति। **उपचारच्छलम्-** सूत्रितं *न्यायसूत्र*कारेण- 'धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपाचारच्छलम्'[14] इति। अत्र उपचारच्छलमिति लक्ष्यम्। धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेधत्वं लक्षणमिति। लक्षणस्थपदानां विश्लेषणं विधीयते- धर्मविकल्पनिर्देशे इत्यत्र धर्मः नाम यथार्थशब्दप्रयोगः, विकल्पः नाम विविधः कल्पः, अतः धर्मविकल्पः नाम- यथार्थार्थाद्भिन्नः लाक्षणिकः अर्थः, तस्य निर्देशे धर्मविकल्पनिर्देशे। भाष्यकारेण *न्यायसूत्रभाष्ये* निगदितं- 'अभिधानस्य धर्मः यथार्थप्रयोगः, धर्मविकल्पोऽन्यत्र दृष्टस्यान्यत्र प्रयोगः, तस्य निर्देशे धर्मविकल्पनिर्देशे'[15] इति। अर्थसद्भावप्रतिषेधः नाम शक्तिलक्षणयोः एकतरवृत्त्या प्रयुक्ते शब्दे तदपरवृत्त्या यः प्रतिषेधः, तदुपाचाच्छलम्। अतः सूत्रार्थो भवति- लोकप्रसिद्धलाक्षणिकार्थे प्रयुक्तस्य शब्दस्य मुख्यार्थं संगृह्य यो विघात भवति तदेव उपाचारच्छलम्।

उदाहरणं यथा- मञ्चाः क्रोशन्ति इति। मञ्चः नाम काष्ठसंघातविशेषः। क्रोशनं नाम आह्वानं चेतननिष्ठम्। आह्वानक्रिया काष्ठसंघातविशेषे मञ्चे न तिष्ठति। अतः वादी लक्ष्यार्थम् अङ्गीकृत्य मञ्चाः क्रोशन्ति इति वाक्यं प्रयुङ्क्ते। प्रतिवादी मुख्यार्थं संगृह्य वादिवाक्ये दोषमुद्भावितवान्- मञ्चस्था एव क्रोशन्ति न तु मञ्चाः इति। अतः वादिवाक्यं न यथार्थम्। अत्र स्पष्टं प्रतीयते यत्, वादी लक्ष्यार्थम् अङ्गीकृत्य वाक्यं प्रयुक्तवान्, परन्तु प्रतिवादी मुख्यार्थम् अङ्गीकृत्य वाक्ये दोषान् उपस्थापितवान्। ननु यस्मिन् कस्मिन् अर्थेऽपि लक्षणा युक्ता इति चेन्न, मुख्यार्थसम्बन्धविशेष एव लक्षणा। तल्लभ्य अर्थः लक्ष्यार्थः उपचारयुक्तः। महर्षिगौतमेन द्वितीयाध्यायस्य द्वितीयाह्निके उपचारविषये निगदितम्- 'सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतदभावे पितदुपचारः'[16] इति। अत्र मुख्यार्थः मञ्चः स्वाधेयतासम्बन्धेन मञ्चस्थपुरुषे अर्थः कल्प्यते।

एतावत्पर्यन्तं छलसस्य स्वरूपं निरूपितम्, अधुना अपवर्गे तस्य उपयोगित्वं निरूपत्यते।

### 3. छलस्योपगित्वम् निःश्रेयसप्राप्तौ

नैयायिकनये पदार्थानां तत्त्वज्ञानात् मिथ्याज्ञाननाशो भवति, मिथ्याज्ञाननाशात् दोषनाशः, दोषनाशात् प्रवृत्तिनाशः, प्रवृत्तिनाशात् जन्मनाशः, जन्मनाशात् दुःखनाशो जायते अनन्तरम् अपवर्गः लभते। पदार्थानां तत्त्वज्ञानं भवति श्रवणमननिदिध्यासनेन। तत्र श्रवणं हि वेदान्तानाम् अद्वितीयवस्तूनि ब्रह्मणि तात्पर्यावधारणानुकूला मानसिकी क्रिया षड्विधलिङ्गैरेव। तथाहि उच्यते *वेदान्तपरिभाषायाम्-* 'श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया'[17] इति। वेदान्तसारेऽपि- 'श्रवणं नाम षड्विधलिङ्गैः अशेषवेदान्तानाम् अद्वितीयवस्तुनि तात्पर्यावधारणम्।[18]' इति। श्रवणादनन्तरम् उत्तराङ्गत्वेन मननम् आवश्यकम्। मननं हि विरोधीसंशीतिनां तत्प्रतिपादकयुक्तिना नितरां निराकरणम्। अर्थात् प्रमाणान्तरेण मूलप्रतिपादिततत्त्वानां निश्चितीकरणम्। तथा उच्यते *वेदान्तपरिभाषायाम्-* 'मननं नाम शब्दाऽवधारितेऽर्थे मानान्तरविरोधिशङ्कायां तन्निराकरणानुकूलतर्कात्मकज्ञानजनकमानसव्यापारः।[19]' इति। *वेदान्तसारे* उदीरितम्- 'मननं तु श्रुतस्य अद्वितीयवस्तुनः वेदान्तानुगुणयुक्तिभिः अनवरतम् अनुचिन्तनम्'[20] इति। मननादन्तरं निदिध्यासनम्। दुर्वासनादिविषयेषु आकृष्यमाणस्य चित्तस्य आत्मविषयीकरणम्। यथा उच्यते- 'निदिध्यासननं नाम अनादिदुर्वासनाया विषयेषु आकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्य आत्मविषयकस्थैर्यानुकूलो मानसव्यापारः।'[21] इति। छलस्योपयोगः मनने। मनने विरोधीसंशीतिनां तत्प्रतिपादकयुक्तिना नितरां निराकरणं भवति। आत्माविषयकमिथ्याज्ञाननाशे एव मुक्तिर्भवति। आत्मविषयकमिथ्याज्ञाननाशः मननस्थले सयुक्ति प्रतिवादिमतनिरकरणेन एव भवति। तत्र हेत्वाभासप्रयोगेण जल्पेन च भवति। जल्पं लक्षयति- 'यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपलम्भो जल्पः'[22] इति। छलजातिनिग्रहस्थानेन परकीयानुमानेन वादिप्रतिवादिनोः यत्रः जल्पः। केवलं छलेन परपक्षस्य उपलम्भः एव भवति साक्षात्, परम्परया एव स्वपक्षसिद्धिर्भवति। यथा- वादी आदौ आत्मविषयकसद्धेतुप्रदर्शनपूर्वकं युक्तिं ददाति आत्मा शरीरादिभिन्नः इति। प्रतिवादी कुतार्किकः इन्द्रियम् आत्मा, मनः

आत्मा इति आत्मविषयकअसद्धेतुप्रदानेन असदुत्तरेण छलेन वादियुक्तिं निराकर्तुं चेष्टते। तदा वादी यथार्थतत्त्वनिर्णयार्थं छलप्रयोगं कर्तुं शक्नोति। तत्तु प्रयोजनाय एव। स्वस्य धनादिलाभार्थमिति तु न। अतः छलस्य प्रयोजनं तत्त्वनिर्णयः एव। तथाहि वात्स्यायनाचार्येण *न्यायसूत्रभाष्ये* निगदितम्- 'तदेतद्विद्यापरिपालनार्थं, न लाभपूजाख्यात्यर्थम्'[23] इति।

एवं क्रमेण विरोधवादीनां मतं छलप्रयोगेन निराकरणपूर्वकं तत्त्वज्ञानस्य प्रकाशो भवति। विरोधीनां संशितीनिराकरणपूर्वकं मननं भवति अतः तत्त्विविदां तत्त्वज्ञानस्य परिपक्वता लभते एव। अनेन स्पष्टं प्रतीयते यत् छलपदार्थः आत्मतत्त्वसाक्षाकारे साक्षात्कारणं न भवति, परन्तु परम्परायां मोक्षलाभस्य सहायकः भवति। छलज्ञानेन कुतार्किकानां देहात्मवादिनां मनः-आत्मवादिनां इन्द्रियात्मवादिनां पुत्रात्मवादिनम् आत्मविषयककूटसिद्धान्ते वादिनां मतिर्न स्यात्, अयं आत्मा न इति यथार्थज्ञानमपि भवति। छलेन परपक्षोलम्भो भवति, स्वपक्षसिर्द्धिर्भवति। अयमात्मा देहादिभिन्नः इति आत्मतत्त्वस्य यथार्थज्ञानमपि भवति। आत्मतत्त्वस्य यथार्थज्ञानात् मिथ्याज्ञाननाशः भवति, मिथ्याज्ञाननाशात् दोषनाशः, दोषनाशात् प्रवृत्तिनाशः, प्रवृत्तिनाशात् जन्मनाशः, जन्मनाशात् दुःखनाशः। दुःखस्य आत्यन्तिकनिवृत्तिरेव मोक्षः। अतः परम्परया छलेन एव निःश्रेयसप्राप्तिर्भवति इति।

## 4. उपसंहृतिः

तापत्रयेण पराहतानां सर्वेषाम् आपामरप्राणीनां परमपप्रयोजनं दुःखनिवृत्तिः। दुःखनिवृत्तये ते शास्त्रमनुधावन्ति। शास्त्रम उपदिशति। पदार्थतत्त्वज्ञानात् मुक्तिः। परन्तु केषां पदार्थानां तत्त्वज्ञानात् मुक्तिः, उच्यते प्रमाणादिपदार्थानाम्। तन्मध्ये छलम् अन्यतमम्। अतः पदार्थज्ञानेऽपि मुक्तिर्भवति। अतः मुक्तौ छलस्योपयोगित्वं वर्तते एव। तात्पर्यविनिश्चये मननं मूललम्। मननं प्रतिवादिनः मतमुपलम्भपुरःसरं छलादिना स्वमतप्रतिष्ठापनम्। अतः परम्पराक्रमेण निःश्रेयसे छलस्योपगित्वं वर्ततेतरामिति शम्।।

## तथ्यसूत्राणि

[1] गौतमः। (२०१४) । *न्यायसूत्रम्*। सम्पा. फणिभूषणतर्कवागीशः। *न्यायदर्शनम्* (सू-१.१.१, पृ.१९)। कलिकाता : संस्कृतवुकडिपो।
[2] गौतमः। (२०१४) । *न्यायसूत्रम्*। सम्पा. फणिभूषणतर्कवागीशः। *न्यायदर्शनम्* (सू-१.१.२, पृ.६३)। कलिकाता : संस्कृतवुकडिपो।
[3] *श्रीमद्भगवद्गीता,* दशमोऽध्यायः,श्लोक-३६ पृ.११४।
[4] गौतमः। (२०१४) । *न्यायसूत्रम्*। सम्पा. फणिभूषणतर्कवागीशः। *न्यायदर्शनम्* (सू- १.२.१०)। कलिकाता : संस्कृतवुकडिपो।
[5] वाचस्पतिमिश्रः। (१९८२)। *न्यायवार्तिकतात्पर्यटीका* (सू- १.२.१०)। सम्पा. राजेश्वरशास्त्रीद्राविडः। काशी : विद्याविलासः।
[6] विश्वनाथः। (२०१५)। *न्यायसूत्रवृत्तिः* (सू- १.२.१०, पृ.३२९)। सम्पा. सेख-साविर-आलिः। कलिकाता : संस्कृतपुस्तकभाण्डार।
[7] विश्वनाथः। (२०१५)। *न्यायसूत्रवृत्तिः* (सू- १.२.१०, पृ.३२९)। सम्पा. सेख-साविर-आलिः। कलिकाता : संस्कृतपुस्तकभाण्डार।
[8] गौतमः। (२०१४) । *न्यायसूत्रम्*। सम्पा. फणिभूषणतर्कवागीशः। *न्यायदर्शनम् (सू-१.२.११, पृ.४४३)*। कलिकाता : संस्कृतवुकडिपो।
[9] गौतमः। (२०१४) । *न्यायसूत्रम्*। सम्पा. फणिभूषणतर्कवागीशः। *न्यायदर्शनम् (सू- १.२.१२, पृ. ४४४)*। कलिकाता : संस्कृतवुकडिपो।
[10] *न्यायवार्तिकम्*-१.२.१२।
[11] वाचस्पतिमिश्रः। (१९८२)। *न्यायवार्तिकतात्पर्यटीका* (सू- १.२.१२)। सम्पा. राजेश्वरशास्त्रीद्राविडः। काशी :विद्याविलासः।
[12] विश्वनाथः। (२०१५)। *न्यायसूत्रवृत्तिः* (पृ. ३३४)। सम्पा. सेख-साविर-आलिः। कलिकाता : संस्कृतपुस्तकभाण्डार।
[13] वाचस्पतिमिश्रः। (१९८२)। *न्यायवार्तिकतात्पर्यटीका* (सू१.२.१३)। सम्पा. राजेश्वरशास्त्रीद्राविडः। काशी : विद्याविलासः।
[14] गौतमः। (२०१४) । *न्यायसूत्रम्*। सम्पा. फणिभूषणतर्कवागीशः। *न्यायदर्शनम् (सू-१.२.१४, पृ.४५४)*। कलिकाता : संस्कृतवुकडिपो।
[15] गौतमः। (२०१४) । *न्यायसूत्रम्*। सम्पा. फणिभूषणतर्कवागीशः। *न्यायदर्शनम् (सू-१.२.१४, पृ.४५४)*। कलिकाता : संस्कृतवुकडिपो।
[16] *न्यायसूत्रम्*- २.२.६२।
[17] धर्मराजाध्वरीन्द्रः। (१३७७बङ्गाव्दः) *वेदान्तपरिभाषा* (पृ.३३१।) । सम्पा. पञ्चाननशास्त्री। कलिकाता : संस्कृतपुस्तकभाण्डार।
[18] सदानन्दयोगीन्द्रः। (१४२४ वङ्गाब्दः। )। *वेदान्तसारः* (पृ.१६३) । सम्पा. मेधाचैतन्यः। कलिकाताः संस्कृतपुस्तकभाण्डार।

[19] धर्मराजाध्वरीन्द्रः। (२००४)। *वेदान्तपरिभाषा* (पृ.१३३)। सम्पा. श्रीशरच्चन्द्रघोषालः। कलिकाता : संस्कृतपुस्तकभाण्डारः।

[20] सदानन्दयोगीन्द्रः। (१४२४ वङ्गाब्दः। )। *वेदान्तसारः* (पृ.१६८) । सम्पा. मेधाचैतन्यः। कलिकाता: संस्कृतपुस्तकभाण्डार।

[21] धर्मराजाध्वरीन्द्रः। (२००४)। *वेदान्तपरिभाषा* (पृ.१३३)। सम्पा. श्रीशरच्चन्द्रघोषालः। कलिकाता : संस्कृतपुस्तकभाण्डारः।

[22] गौतमः। (२०१४) । *न्यायसूत्रम्*। सम्पा. फणिभूषणतर्कवागीशः। *न्यायदर्शनम्* सू-१.२.२, पृ.३७८)। कलिकाता : संस्कृतवुकडिपो।

[23] वात्स्यायनः। (१९९८)। *न्यायभाष्यम्* (४.२.५१)। सम्पा. द्वारिकादासशास्त्री। वारणासी : साधना प्रेस।

**सन्दर्भग्रन्थसंकेताः**

1. अमरसिंहः। *अमरकोशः*। सम्पा. विश्वनाथझा। दिल्ली : मोतीलाल वनारसी दास, २००७।
2. गौतमः। *न्यायदर्शनम्*। सम्पा. फणिभूषणतर्कवागीशः। कलिकाता : संस्कृतवुकडिपो, २०१४।
3. धर्मराजाध्वरीन्द्रः। *वेदान्तपरिभाषा*। सम्पा. श्रीशरच्चन्द्रघोषालः। कलिकाता : संस्कृतपुस्तकभाण्डारः, २००४।
4. धर्मराजाध्वरीन्द्रः। *वेदान्तपरिभाषा*। सम्पा. पञ्चाननशास्त्री। कलिकाता : संस्कृतपुस्तकभाण्डार, १३७७बङ्गाव्दः।
5. धर्मराजाध्वरीन्द्रः। वेदान्तपरिभाषा *श्रीपेद्दादीक्षितविरचितप्रकाशिकाख्यव्याक्यासमेता*। सम्पा. साम्बशिवशास्त्रिणा। त्रिवान्द्रम् : राजकीयमुद्रणयन्त्रालयः। १९२८।
6. वात्स्यायनः। *न्यायभाष्यम्*। सम्पा. द्वारिकादासशास्त्री। वारणासी : साधना प्रेस, १९९८।
7. वाचस्पतिमिश्रः। *न्यायवार्तिकतात्पर्यटीका*। सम्पा. राजेश्वरशास्त्रीद्राविडः। काशी : विद्याविलासः, १९८२।
8. विश्वनाथः। *न्यायसूत्रवृत्तिः*। सम्पा. सेख-साविर-आलिः। कलिकाता : संस्कृतपुस्तकभाण्डार,२०१५।
9. *श्रीमद्भगवद्गीता*। गोरखपुर: गीताप्रेस, २०१६।
10. सदानन्दयोगीन्द्रः। *वेदान्तसारः*। सम्पा. मेधाचैतन्यः। कलिकाता: संस्कृतपुस्तकभाण्डार, १४२४ वङ्गाब्दः।